# श्री काळी क्रम स्तवः

**श्री काळी क्रम स्तवः**

नमामि काळिका देवीं कलिकल्मषनाशिनीं |
नमामि शंभुपत्नीं च नमामि भवसुंदरीं || 1 ||

आद्यां देवी नमस्कृत्य नमस्त्रैलोक्यमोहिनीं |
नमामि सत्यसंकल्पां सर्वपर्वतवासिनीं || 2 ||

पार्वतीं च नमस्कृत्य नमो नित्यं नगात्मजे || 3 ||

मातस्त्वदीय चरणं शरणं सुराणां
ध्यानास्पदैर्दिशति वांछितवांछनीयं |
येषां हृदि स्फुरति तच्चरणारविंदं
धन्यास्त एव नियतं सुरलोकपूज्याः || 4 ||

गंधैः शुभैः कुंकुम पंकलेपै
मतिस्त्वदीयं चरणं हि भक्ताः |
स्मरंति शृण्वंति लुठंतिधीरा-
-स्तेषां जरानैव भवेद्भवानि || 5 ||

तवांघ्रि पद्मं शरणं सुराणां
परापरा त्वं परमा प्रकृष्टिः |
दिने दिने देव भवेत् करस्थः
किमन्यमुच्चैः कथयंति संतः || 6 ||

कवींद्राणां दर्पं करकमलशोभा परिचितं |
विधुन्वज्जंघा मे सकलगणमेतद्गिरिसुते || 7 ||

अतस्त्वत्पादाब्जं जननि सततं चेतसि मम |
हितं नारीभूतं प्रणिहितपदं शांकरमपि || 8 ||

ये ते दरिद्राः सततं हि मात-
-स्त्वदीयपादं मनसा नमंति |
देवासुराः सिद्धवराश्च सर्वे
तव प्रसादात् सततं लुठंति || 9 ||

हरिस्त्वत्पादाब्जं निखिलजगतां भूतिरभवत् |
शिवो ध्यात्वा ध्यात्वा किमपि परमं तत्परतरं || 10 ||

प्रजानां नाथोऽयं तदनु जगतां सृष्टिविहितं |
किमन्यत्ते मातस्तव चरणयुग्मस्य फलता || 11 ||

इंद्रः सुराणां शरणं शरण्ये
प्रजापतिः काश्यप एव नान्यः |
वरः पतिर्विष्णुभवः परेशि
त्वदीयपादाब्जफलं समस्तं || 12 ||

त्वदीयनाभी नव पल्लवेवा
नवांकुरैर्लोमवरैः प्रफुल्लं |
सदा वरेण्ये शरणं विधेहि
किं वापरं चित्तवरैर्विभाव्यं || 13 ||

त्वदीय पादार्चित वस्तु संभवः
सुरासुरैः पूज्यमवाय शंभुः |
त्वदीय पादार्चन तत्परे हरिः
सुदर्शनाधीश्वरतामुपालभत् || 14 ||

धरित्री गंधरूपेण रसेन च जलं धृतं |
तेजो वह्निस्वरूपेण प्रणवे ब्रह्मरूपधृक् || 15 ||

मुखं चंद्राकारं त्रिभुवनपदे यामसहितं
त्रिनेत्रं मे मातः परिहरति यः स्यात् स तु पशुः |
न सिद्धिस्तस्य स्यात् सुरतसततं विश्वमखिलं
कटाक्षैस्ते मातः सफलपदपद्मं स लभते || 16 ||

ऋतुस्त्वं हरिस्त्वं शिवस्त्वं मुरारेः
पुरा त्वं परा त्वं सदशीर्मुरारेः |
हरस्त्वं हरिस्त्वं शिवस्त्वं शिवानां
गतिस्त्वं गतिस्त्वं गतिस्त्वं भवानि || 17 ||

नवाऽहं नवा त्वं नवा वा क्रियाया
वरस्त्वं चरुस्त्वं शरण्यं शरायाः |
नदस्तवं नदीं त्वं गतिस्त्वं निधीनां
सुतस्त्वं सुता त्वं पिता त्वं गृहीणां || 18 ||

त्वदीय मुंडाख्य भवानि मालां
विधाय चित्ते भव पद्मजाप्यः |
सुराधिपत्वं लभते मुनींद्रः
शरण्यमेतत् किमयीह चान्यत् || 19 ||

नरस्य मुंडं च तथा हि खड्गं
भुजद्वये ये मनसा जपंति |
सव्येतरे देवि वराभयं च
भवंति ते सिद्धजना मुनींद्राः || 20 ||

शिरोपरि त्वां हृदये निधाय
जपंति विद्यां हृदये कदाचित् |
सदा भवेत्काव्यरसस्य वेत्ता
अंते परद्वंद्वमुपाश्रयेत || 21 ||

दिगंबरा त्वां मनसा विचिंत्य
जपेत्पराख्यां जगतां जनीति |
जपेत्पराख्यां जगतां मतिश्च
किंवा पराख्यां शरणं भवामः || 22 ||

शिवाविरावैः परिवेष्टितां त्वां
निधाय चित्ते सततं जपंति |
भवेय देवेशि परापरादि
निरीशतां देवि परा वदंति || 23 ||

त्वदीय शृंगाररसं निधाय
जपंति मंत्रं यदि वेदमुख्या |
भवंति ते देवि जनापवादं
कविः कवीनामपि चाग्रजन्मा || 24 ||

विकीर्णवेशां मनसा निधाय
जपंति विद्यां चकितं कदाचित् |
सुधाधिपत्यं लभते नरः स
किमस्ति भूम्यां शृणु कालकाळि || 25 ||

त्वदीय बीजत्रयमातरेत-
-ज्जपंति सिद्धास्तु विमुक्तिहेतोः |
तदेव मातस्तवपादपद्मा
भवंति सिद्धिश्च दिनत्रयेऽपि || 26 ||

त्वदीय कूर्चद्वयजापकत्वा-
-त्सुरासुरेभ्योऽपि भवेच्च वर्णः |
धनित्व पांडित्यमयंति सर्वे
किं वा परान् देवि परापराख्या || 27 ||

त्वदीय लज्जाद्वय जापकत्वा-
-द्भवेन्महेशानि चतुर्थसिद्धिः |
त्वदीय सत्सिद्धि वरप्रसादा-
-त्तवाधिपत्यं लभते नरेशः || 28 ||

ततः स्वनाम्नः शृणु मातरेत-
-त्फलं चतुर्वर्ग वदंति संतः |
बीजत्रयं वै पुनरप्युपास्य
सुराधिपत्यं लभते मुनींद्रः || 29 ||

पुनस्तथा कूर्चयुगं जपंति
नमंति सिद्धा नरसिंहरूपा |
ततोऽपि लज्जाद्वयजापकत्वा
लभंति सिद्धिं मनसो जनास्ते || 30 ||

त्रिपंचारे चक्रे जननि सततं सिद्धि सहितां |
विचिन्वन् संचिन्वन् परममृतं दक्षिण पदं || 31 ||

सदाकाळी ध्यात्वा विधि विहित पूजापरिकरा |
न तेषां संसारे विभवपरिभंगप्रमथने || 32 ||

त्वं श्रीस्त्वमीश्वरी काळी त्वं ह्रीस्त्वं च कराळिका |
लज्जा लक्ष्मीः सती गौरी नित्याचिंत्या चितिः क्रिया || 33 ||

अकुल्याद्यैश्चित्ते प्रचयपदपद्यैः पदयुतैः
सदा जप्त्वा स्तुत्वा जपति हृदि मंत्रं मनुविदा |
न तेषां संसारे विभवपरिभंगप्रमथने
क्षणं चित्तं देवि प्रभवति विरुद्धे परिकरं || 34 ||

त्रयस्त्रिंशैः श्लोकैर्यदि जपति मंत्रं स्तवति च
नमच्चैतानेतान् परममृतकल्पं सुखकरं |
भवेत् सिद्धि शुद्धौ जगति शिरसा त्वत्पदयुगं
प्रणम्यं प्रकाम्यं वरसुरजनैः पूज्यवितितिं || 35 ||

इति श्री काळी क्रम स्तवः |